# Shri Sadashiva Kavacha Stotram

# શ્રીસદાશિવકવચસ્તોત્રમ્

## Document Information

Text title : Shri Sadashiva Kavacha Stotram

File name : sadAshivakavachastotram.itx

Category : shiva, kavacha

Location : doc_shiva

Proofread by : NA

Latest update : August 10, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# શ્રીસદાશિવકવચસ્તોત્રમ્

શ્રીદેવ્યુવાચ-
ભગવન્દેવદેવેશ સર્વામ્નાય પ્રપૂજિત ।
સર્વં મે કથિતં દેવ કવચં ન પ્રકાશિતમ્ ॥ ૧॥

પ્રાસાદાખ્યસ્ય મન્ત્રસ્ય કવચં મે પ્રકાશય ।
સર્વરક્ષાકરં દેવ યદિ સ્નેહોઽસ્તિ માં પ્રતિ ॥ ૨॥

શ્રીભગવાનુવાચ-
પ્રાસાદમન્ત્રકવચસ્ય વામદેવઋષિઃ ।
પઙ્ક્તિશ્છન્દઃ । સદાશિવો દેવતા ।
સકલાભીષ્ટસિદ્ધયે જપે વિનિયોગઃ ।
શિરો મે સર્વદા પાતુ પ્રાસાદાખ્યઃ સદાશિવઃ ।
ષડક્ષરસ્વરૂપો મે વદનં તુ મહેશ્વરઃ ॥ ૩॥

પઞ્ચાક્ષરાત્મા ભગવાન્ભુજૌ મે પરિરક્ષતુ ।
મૃત્યુઞ્જયસ્ત્રિબીજાત્મા આસ્યં રક્ષતુ મે સદા ॥ ૪॥

વટમૂલં સમાસીનો દક્ષિણામૂર્તિરવ્યયઃ ।
સદા માં સર્વદઃ પાતુ ષટ્ત્રિંશાર્ણસ્વરૂપધૃક્ ॥ ૫॥

દ્વાવિંશાર્ણાત્મકો રુદ્રો દક્ષિણઃ પરિરક્ષતુ ।
ત્રિવર્ણાત્મા નીલકણ્ઠઃ કણ્ઠં રક્ષતુ સર્વદા ॥ ૬॥

ચિન્તામણિર્બીજરૂપો હ્યર્ધનારીશ્વરો હરઃ ।
સદા રક્ષતુ મે ગુહ્યં સર્વસમ્પત્પ્રદાયકઃ ॥ ૭॥

એકાક્ષરસ્વરૂપાત્મા કૂટવ્યાપી મહેશ્વરઃ ।
માર્તણ્ડભૈરવો નિત્યં પાદૌ મે પરિરક્ષતુ ॥ ૮॥

તુમ્બુરાખ્યો મહાબીજસ્વરૂપઃ ત્રિપુરાન્તકઃ ।
સદા માં રણભૂમૌ ચ રક્ષતુ ત્રિદશાધિપઃ ॥ ૯॥

ઊર્ધ્વમૂર્દ્ધાનમીશાનો મમ રક્ષતુ સર્વદા ।
દક્ષિણાસ્યં તત્પુરુષઃ પાયાન્મે ગિરિનાયકઃ ॥ ૧૦॥

અઘોરાખ્યો મહાદેવઃ પૂર્વાસ્યં પરિરક્ષતુ ।
વામદેવઃ પશ્ચિમાસ્યં સદા મે પરિરક્ષતુ ॥ ૧૧॥

ઉત્તરાસ્યં સદા પાતુ સદ્યોજાતસ્વરૂપધૃક્ ।
ઇત્થં રક્ષાકરં દેવિ કવચં દેવદુર્લભમ્ ॥ ૧૨॥

પ્રાતઃકાલે પઠેદ્યસ્તુ સોઽભીષ્ટં ફલમાપ્નુયાત્ ।
પૂજાકાલે પઠેદ્યસ્તુ કવચં સાધકોત્તમઃ ॥ ૧૩॥

કીર્તિશ્રીકાન્તિમેધાયુઃ સહિતો ભવતિ ધ્રુવમ્ ।
કણ્ઠે યો ધારયેદેતત્કવચં મત્સ્વરૂપકમ્ ॥ ૧૪॥

યુદ્ધે ચ જયમાપ્નોતિ દ્યૂતે વાદે સ સાધકઃ ।
કવચં ધારયેદ્યસ્તુ સાધકો દક્ષિણે ભુજે ॥ ૧૫॥

દેવા મનુષ્યા ગન્ધર્વા વશ્યાસ્તસ્ય ન સંશયઃ ।
કવચં શિરસા યસ્તુ ધારયેદ્યતમાનસઃ ॥ ૧૬॥

કરસ્થાસ્તસ્ય દેવેશિ અણિમાદ્યષ્ટસિદ્ધયઃ ।
ભૂર્જપત્રે ત્વિમાં વિદ્યાં શુક્લપક્ષેણ વેષ્ટિતામ્ ॥ ૧૭॥

રજતોદરસંવિષ્ટાં કૃત્વા વા ધારયેત્સુધીઃ ।
સંપ્રાપ્ય મહતીં લક્ષ્મીમન્તે મદ્દેહરૂપભાક્ ॥ ૧૮॥

યસ્મૈ કસ્મૈ ન દાતવ્યં ન પ્રકાશ્યં કદાચન ।
શિષ્યાય ભક્તિયુક્તાય સાધકાય પ્રકાશયેત્ ॥ ૧૯॥

અન્યથા સિદ્ધિહાનિઃ સ્યાત્સત્યમેતન્મનોરમે ।
તવ સ્નેહાન્મહાદેવિ કથિતં કવચં શુભમ્ ॥ ૨૦॥

ન દેયં કસ્યચિદ્ભદ્રે યદીચ્છેદાત્મનો હિતમ્ ।
યો અર્ચયેદ્ગન્ધપુષ્પાદ્યૈઃ કવચં મન્મુખોદિતં
તેનાર્ચિતા મહાદેવિ સર્વે દેવા ન સંશયઃ ॥ ૨૧॥

ઇતિ શ્રીભૈરવતન્ત્રે શ્રીસદાશિવકવચં સમ્પૂર્ણમ્ ।

*Shri Sadashiva Kavacha Stotram*

pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*